**विद्या भवन बालिका विद्यापीठ लखीसराय**

**वर्ग दशम् विषय संस्कृत शिक्षक श्यामउदय सिंह**

**ता:-०१/०६/२०२० (बोर्ड बेस्ड क्वेश्चन)**

***अधोलिखितनाट्यांशं पठित्वा तदाधारितानां प्रश्नानां उत्तराणि लिखत –**

वयस्व! अपूर्वोऽयं मानवानां सरस्वत्यवतार: तदहं सुहृज्जनसाधारणं श्रोतुच्छामि। सन्निधीयतां सभासद: ,प्रेष्यतामस्मदन्तिकं सौमित्रि: अहमप्येतयोश्चिरासनपरिखेदं विहरणं कृत्वा अपनयामि ।(इति निष्क्रान्ता: सर्वे) ।

**१.एकपदेन उत्तरत –**

(i) क: सुहृज्जनसाधारणं श्रोतुम् इच्छति ?

(ii)राम: कं अन्तिकं प्रेषयितुम् अकथयत् ?

**२.पूर्णवाक्येन उत्तरत –**

**(i)**सरस्वत्यावतार: कीदृश: अस्ति?

**(ii)राम:** चिरासनपरिखेदं किं कृत्वा अपनयति?

**३.भाषिककार्यम् –**

(i)अत्र 'सौमित्रि:' इति पदं कस्मै प्रयुक्तम् ?

(ii) ‘शान्तं क्रियताम् ' इत्यर्थे किं पदं अत्र प्रयुक्तम् ?

(iii)’अहमप्येतयोश्चिरासनपरिखेदम् ' अस्मिन् पदे अव्ययपदं किम्?

(iv)'अपनयामि' इति क्रियापदस्य कर्तृपदं किम् अस्ति?

***अधोलिखितश्लोकस्य अन्वयं मञ्जूषात: उचितं पदं चित्वा लिखत –**

**श्लोक:** भवति शिशुजनो वयोऽनुरोधाद्
गुणमहतामपि लालनीय एव।
व्रजति हिमकरोऽपि बालभावात्
पशुपति-मस्तक-केतकच्छदत्वम् ।।

**अन्वय:**-(i) ................. अपि वयोऽनुरोधात् (ii) ...........................लालनीय: एवं भवति ।बालभावात् हि (iii) ...... अपि पशुपति- (iv) ...............................केतकच्छदत्वम् व्रजति ।

मञ्जूषा

[गुणमहताम् , मस्तक ,हिमकर: ,शिशुजन:]